**आदर्शप्रश्नपत्रम्**

**संस्कृतम् (सम्प्रेषणात्मकम्)**

**कक्षा - दशमी**

**(सङ्कलनात्मकं मूल्याङ्कनम्)**

**(प्रथमसत्रम्)**

**समय : होरात्रयम्** **पूर्णाङ्का: 80**

**निर्देशा:**

(i) प्रश्नपत्रे चत्वार: खण्डा: सन्ति।

| | | | |
|---|---|---|---|
| **खण्ड: (क)** | **अपठित-अवबोधनम्** | - | **8 अङ्का:** |
| **खण्ड: (ख)** | **रचनात्मकं कार्यम्** | - | **16 अङ्का:** |
| **खण्ड: (ग)** | **अनुप्रयुक्तव्याकरणम्** | - | **24 अङ्का:** |
| **खण्ड: (घ)** | **पठित-अवबोधनम्** | - | **32 अङ्का:** |

(ii) सर्वे प्रश्ना: अनिवार्या:।

(iii) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।

(iv) प्रश्नसंख्या अवश्यं लेखनीया।

(v) उत्तराणि संस्कृतेन एव लेखनीयानि।

## खण्ड:- (क) अपठित-अवबोधनम्

1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत- 8

जीवने समय: एव सर्वाधिक: मूल्यवान् भवति। व्यतीतस्य समयस्य एकम् अपि क्षणम् केनापि प्रयत्नेन पुन: प्राप्तुं न शक्नोति कोऽपि जन:। अत: प्रत्येकं क्षणस्य सदुपयोग: सावधानेन मनसा करणीय: सर्वै: जनै: विशेषत: विद्यार्थिभि:। यथा वयम् अर्जितस्य धनस्य एकैकस्य पणस्य व्ययं सम्यक् विचार्य कुर्म: तथैव एकैकस्य क्षणस्य अपि सदुपयोगं विवेकेन कुर्याम। एक: अपि क्षण: वृथा न यापनीय:। असावधानतया आलस्येन च निरर्थकं नीत: समय: पश्चातापस्य असफलताया: च कारणं भवति। य: मानव: समयस्य महत्त्वम् अवगच्छति तस्य सदुपयोगं च करोति स एव महान् भवति।

प्रश्ना: -

I. एकपदेन उत्तरत :- ½×4=2

(i) मानव: कस्य सदुपयोगं कृत्वा महान् भवति?

(ii) सर्वाधिक: मूल्यवान् क:?

(iii) एकैकस्य क्षणस्य सदुपयोगं केन कुर्याम?

(iv) किम् व्यतीत: समय: पुन: प्राप्तुं शक्यते?

II. पूर्णवाक्येन उत्तरत :- 1×2=2

(i) निरर्थकं नीत: समय: कस्य कारणं भवति?

(ii) प्रत्येकं क्षणस्य उपयोग: कथं करणीय:?

III. प्रदत्तविकल्पेभ्य: उचितम् उत्तरं निर्देशानुसारं चित्वा लिखत :- 1×4=4

(i) 'कुर्म:' इति क्रियापदस्य कर्तृपदं किम्?

(अ) विचार्य (ब) सम्यक्

(स) वयम् (द) व्ययम्

(ii) 'मनसा' इति पदस्य विशेषणपदं गद्यांशे किम् प्रयुक्तम्?

(अ) सावधानेन (ब) सदुपयोग:

(स) करणीय: (द) प्रत्येकम्

(iii) ''उद्यमेन'' इति पदस्य विलोमपदं गद्यांशे किं प्रयुक्तम्?

(अ) सावधानेन (ब) विवेकेन

(स) आलस्येन (द) प्रयत्नेन

(iv) ''सञ्चितस्य'' इति पदस्य पर्यायपदं गद्यांशे किम् प्रयुक्तम्?

(अ) अर्जितस्य (ब) पणस्य

(स) व्यतीतस्य (द) क्षणस्य

**खण्ड:– 'ख' रचनात्मकं कार्यम् 16 अङ्का:**

2. भवान् हर्षवर्धन:। भवत: मित्रं गोविन्द: संस्कृतपठने काठिन्यम् अनुभवति। तं प्रति लिखिते पत्रे रिक्तस्थानानि मञ्जूषायां प्रदत्तशब्दै: पूरयित्वा पत्रं पुन: लिखत। 8

कमलानगरम्
दिल्लीत:
दिनाङ्क: .........................

प्रिय मित्र गोविन्द,
सस्नेहं (i) .........................।

अत्र सर्वं कुशलम्। तत्रापि कुशलं कामये। मित्र! त्वया पत्रे (ii) ........................ यत् त्वं संस्कृतस्य पठने काठिन्यम् अनुभवसि। किन्तु अहं तु किञ्चिदपि काठिन्यं न अनुभवामि। प्रथमं तु अहं कक्षायां दत्तचित्तः भूत्वा सर्वं पाठं शृणोमि यत्र च काचित् (iii) ........................ भवति तत्र आचार्यं पृष्ट्वा लिखामि। गृहम् आगत्य पुनः पुनः (iv) ........................ वाचनं करोमि। अहं प्रतिदिनं अर्धहोरापर्यन्तं पाठानां वाचनम् करोमि। यत्र उच्चारणे अर्थस्य अवबोधने च शङ्का भवति अग्रिमे दिवसे कक्षायाम् (v) ........................ पृच्छामि। अहं तु अभ्यासपुस्तके प्रदत्तानाम् पत्राणां, संवादानाम् अनुच्छेदानाम् अपि (vi) ........................ अध्ययनं करोमि। अनेन मम संस्कृतस्य अवबोधनक्षमतायाः (vii) ........................ अभवत्। अधुना अहं कक्षायां सहपाठिभिः आचार्येण च सह संस्कृतेन वार्तालापं करोमि। मित्र। यदि त्वम् प्रतिदिनं नियमेन पाठानां पुनः-पुनः (vii) ........................ करिष्यसि तदा त्वम् अपि शीघ्रमेव संस्कृतेन वार्तालापं कर्तुं समर्थः भविष्यसि। स्वपितृभ्यां मम प्रणामाः निवेदनीयाः। आशासे यत् शीघ्रमेव पत्रोत्तरं संस्कृतेन एव लिखित्वा प्रेषयिष्यसि।

तव अभिन्नं मित्रम्

हर्ष वर्धनः

| |
|---|
| लिखितम्, वाचनम्, पाठस्य, विकासः आचार्यम्, नियमितम्, नमो नमः, शङ्का, |

3. मञ्जूषायां प्रदत्तशब्दानां सहायतया चित्रं दृष्ट्वा चत्वारि वाक्यानि संस्कृतेन लिखत। 2×4=8



मञ्जूषा

| |
|---|
| तिष्ठति, शाखायाम्, चटका, नदी, पर्वत:, वृक्षौ, पुष्पाणि, स्वच्छम् जलम्, बालौ, सूर्य:, उदेति, वातावरणम्, रमणीयम्, प्रार्थनां कुरुत:, गृहाणि, |

**अथवा**

''जलम् एव जीवनम्'' इति विषयम् अधिकृत्य मञ्जूषायां प्रदत्तशब्दानां सहायतया चत्वारि वाक्यानि संस्कृतेन लिखत :- 2×4=8

| |
|---|
| अस्माकम्, जलम्, जीवनस्य अन्नानि, फलानि, स्नानाय, महत्त्वपूर्णम्, क्षेत्राणां, सिञ्चनम्, विना, आधार: |

## खण्ड:– 'ग' अनुप्रयुक्तव्याकरणम्

4. अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं सन्धिं विच्छेदं वा प्रदत्तविकल्पेभ्य: चित्वा लिखत। 1×4=4

(i) कपय: राजभवने प्राप्तान् <u>स्वर्गसमानोपभोगान्</u> त्यक्तुं न इच्छन्ति।
(अ) स्वर्गसमा + नोपभोगान् (ब) स्वर्गसमान + उपभोगान्
(स) स्वर्गसमानो + पभोगान् (द) स्वर्गसमानोप + भोगान्

(ii) सरस्वत्या: कोष: <u>सम् + चयात्</u> क्षयम् भवति।
(अ) सञ्चयात् (ब) सन्चयात्
(स) सङ्चयात् (द) सम्चयात्

(iii) केन <u>प्रयुक्तोऽयं</u> पुरुष: पापं चरति?
(अ) प्रयुक्तो + यं (ब) प्रयुक्त: + अयम्
(स) प्र + युक्तोऽयं (द) प्रयुक् + तोऽयं

(iv) <u>त्यागात् + शान्ति:</u> भवति।
(अ) त्यागात्शान्ति: (ब) त्यागाच्शान्ति:
(स) त्यागात्छान्ति: (द) त्यागाच्छान्ति:

5. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्य: चित्वा लिखत। 1×4=4

(i) अर्थिनां विरलां संख्यां विलोक्य राजा अचिन्तयत्।

(अ) विरलसंख्यां (ब) विरलासंख्यां

(स) विरलंसंख्यां (द) विरलसंख्यम्

(ii) वानराणां यूथपः सर्वान् वानरान् अवदत्।

(अ) यूथस्य पः (ब) यूथस्य पतिः

(स) यूथं पाति इति (द) यूथं पिबति इति

(iii) बालाः गृहात् एव भोजनसामग्रीम् आनयन्ति।

(अ) भोजनात् सामग्रीम् (ब) भोजनेन सामग्रीम्

(स) भोजनम् सामग्रीम् (द) भोजनाय सामग्रीम्

(iv) अष्टानां वादनानां समाहारे अतिथयः आगमिष्यन्ति।

(अ) अष्टवादने (ब) अष्टवादनम्

(स) अष्टवादनानि (द) अष्टवादनसमाहारे

6. अधोलिखितवाक्येषु रेखाङ्‌िकतपदानां प्रकृतिप्रत्ययौ संयोज्य विभज्य वा समुचितम् उत्तरं प्रदत्तविकल्पेभ्यः चित्वा लिखत। 1×4=4

(i) दग्धाः घोटकाः कथं रक्ष् + अनीयर्।

(अ) रक्षितव्याः (ब) रक्षिणीयम्

(स) रक्षणीयः (द) रक्षणीयाः

(ii) छात्रैः गुरूणां वचनानि सदैव श्रोतव्यानि।

(अ) श्रु + तव्यत् (ब) श्रो + तव्यानि

(स) श्रोतव्य + आनि (द) श्रोत + अव्यानि

(iii) श्रद्धा + मतुप् ज्ञानं लभते।

(अ) श्रद्धामत् (ब) श्रद्धामान्

(स) श्रद्धावान् (द) श्रद्धावानं

(iv) लोके दानिनः धन्याः।

(अ) दानि + नः (ब) दा + निनः

(स) दान + णिनि (द) दान + मतुप्

7. प्रदत्तविकल्पेभ्यः उचितम् अव्ययपदं चित्वा वाक्येषु रिक्तस्थानानि पूरयत। 1×4=4

(i) नृपः बाल्यात् ................................ वृद्धोपसेवी विनयशीलः च आसीत्।

(अ) अपि (ब) एव

(स) इव (द) नूनम्

(ii) मनुष्यः अनिच्छन् ................................ पापं करोति।

(अ) अपि (ब) एव

(स) वृथा (द) सहसा

(iii) वने पशवः ................................. भ्रमन्ति।

(अ) पुरा (ब) तथा

(स) इतस्ततः (द) नूनम्

(iv) वने सिंहः ................................. गर्जति।

(अ) इदानीम् (ब) विना

(स) अत्र (द) उच्चैः

8. अधोलिखिते संवादे रिक्तस्थानानि वाच्यानुसारं प्रदत्तविकल्पेभ्यः उचितं पदं चित्वा पूरयत। 1×4=4

मणिः - सुगन्धे! अद्य समारोहे किं भवति?

सुगन्धा - अद्य मेधाविनः छात्राः .................................।

(अ) सम्मानयन्ति (ब) सम्मान्यन्ते

(स) सम्मानयते (द) सम्मानयति

मणिः - कः छात्रान् सम्मानयति?

सुगन्धाः - अस्माकं राज्यस्य शिक्षानिदेशकः ................................. सम्मानयति।

(अ) अस्मान् (ब) अध्यापकान्

(स) छात्रान् (द) युष्मान्

मणिः - किं छात्राः तत्र सांस्कृतिकं कार्यक्रमम् अपि प्रस्तौष्यन्ति?

सुगन्धा :- आम्, ................................. सांस्कृतिकः कार्यक्रमः अपि प्रस्तूयते।

(अ) छात्राः (ब) छात्रान्

(स) छात्रैः (द) छात्रेभ्यः

मणि :- तदा अहम् अपि त्वया सह चलामि।

सुगन्धा :- अवश्यमेव। ................................. मया सह आगच्छ।

(अ) सः (ब) त्वम्

(स) सा (द) ते

9. अधः रेलयानानां प्रस्थानसमयः अङ्केषु लिखितः। अङ्कानां स्थाने संस्कृतपदैः समयं लिखत। 1×4=4

लखनऊनगरं प्रति गन्तुं रेलयानानां समयसारिणी–

| | | |
|---|---|---|
| प्रातः | 7.00 | वादने शताब्दीरेलयानम्। |
| अपराह्णे | 12.45 | वादने गोमतीरेलयानम्। |
| सायं | 8.15 | वादने वैशालीरेलयानम्। |
| रात्रौ | 10.30 | वादने लखनऊमेलयानम्। |

**खण्डः- 'घ'** **पठित-अवबोधनम्** **अङ्काः32**

10. अधोलिखितं गद्यांशं पद्यांशं नाट्यांशं च पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।

(अ) गद्यांशः

तस्य वचनम् अश्रद्धेयं मत्वा मदोद्धताः कपयः प्रहस्य अवदन्– 'भो! किमिदम् उच्यते? न वयं स्वर्गसमानोपभोगान् विहाय अटव्यां क्षार-तिक्त-कषाय-कटुरुक्षफलानि भक्षयिष्यामः।' तच्छ्रुत्वा साश्रुनयनो यूथपतिः सगद्‌गदम् उक्तवान् - 'रसनास्वादलुब्धाः यूयम् अस्य सुखस्य कुपरिणामं न जानीथ। अहं तु वनम् गच्छामि।'

प्रश्नाः–

I. एकपदेन उत्तरत। ½×2=1

(i) मदोद्धताः कपयः यूथपतेः वचनं कीदृशम् मत्वा अवदन्?

(ii) कीदृशाः कपयः तस्य सुखस्य कुपरिणामं न जानन्ति?

II. पूर्णवाक्येन उत्तरत। 2×1=2

(i) मदोद्धताः कपयः प्रहस्य किम् अवदन्?

III. निर्देशानुसारम् उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत। ½×2=1

(i) 'वयम्' इति कर्तृपदस्य क्रियापदं किम्?

(अ) फलानि (ब) विहाय

(स) भक्षयिष्यामः (द) रुक्षफलानि

(ii) 'यूथपतिः' इति पदस्य विशेषणपदं गद्यांशे किम्?

(अ) सगद्‌गदम् (ब) तच्छ्रुत्वा

(स) साश्रुनयनः (द) उक्तवान्

(आ) पद्यांशः

**तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ!**
**पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम्।।**

प्रश्नाः–

I. एकपदेन उत्तरत। ½×2=1

(i) श्रीकृष्णः कानि नियन्तुं कथयति?

(ii) अर्जुनस्य कृते किं सम्बोधनं श्लोके प्रयुक्तम्?

II. पूर्णवाक्येन उत्तरत। 2×1=2

श्रीकृष्णः अर्जुनं कम् मारयितुम् कथयति?

III. निर्देशानुसारम् शुद्धम् उत्तरं प्रदत्तविकल्पेभ्यः चित्वा लिखत। ½×2=1

(i) अस्मिन् श्लोके 'प्रजहि' इति क्रियापदस्य किम् प्रयुक्तम्?

(अ) त्वम् (ब) एनम्

(स) भरतर्षभ (द) पाप्मानम्

(ii) 'अन्ते' इति पदस्य विलोमपदं श्लोके किम् प्रयुक्तम्?

(अ) तस्मात् (ब) नियम्य

(स) आदौ (द) हि

(इ) नाट्यांशः

**राजा**– भगवन्! भवन्मनोरथं पूरयित्वा आत्मानम् अनुगृहीतं कर्तुम् इच्छामि। आदिश्यताम् किं करवाणि?

**विप्रः**– यदि भवान्, प्रीतः तदा त्वत्तः एकस्य चक्षुषः दानम् इच्छामि येन मम लोकयात्रा निर्बाधा भवेत्। तत् श्रुत्वा राजा अचिन्तयत् ''लोके चक्षुर्दानं दुष्करमेव। नूनम् ईदृशं दानम् इच्छन् अयं याचकः केनापि प्रेरितः स्यात्। अथवा भवतु नाम। किं बहु चिन्तनेन।

**राजा**– भो मित्र! किमेकेन चक्षुषा, अहं भवते चक्षुर्द्वयमेव प्रयच्छामि।

प्रश्नाः–

I. एकपदेन उत्तरत। ½×2=1

(i) लोके किं दुष्करम्?

(ii) राजा कम् अनुगृहीतं कर्तुम् इच्छति?

II. पूर्णवाक्येन उत्तरत। 1×2=2

(i) राजा किम् अचिन्तयत्?

(ii) विप्रः किम् इच्छति?

III. निर्देशानुसारम् शुद्धम् उत्तरं विकल्पेभ्यः चित्वा लिखत। ½×2=1

(i) ''मम लोकयात्रा निर्बाधा ''भवेत्'' अत्र 'मम' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(अ) इन्द्राय (ब) विप्राय

(स) भवते (द) भगवते

(ii) 'स्यात्' इति क्रियापदस्य कर्तृपदं किम्?

(अ) प्रेरितः (ब) दानम्

(स) याचकः (द) केनापि

11. अधोलिखितश्लोकयोः भावार्थं मञ्जूषातः उचितपदानि चित्वा पूरयत। 1×4=4

(क) अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति।
व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात्।।

भावार्थः- हे सरस्वति! तव अयं विद्यायाः (i) ................................ कश्चिद् अद्भुतः अस्ति। यदि वयं अस्य व्ययं कुर्मः तदा अयं वर्धते। यदि तस्य (ii) ............................. ... कुर्मः तदा तस्य क्षयम् भवति।

(क) कोऽनर्थफलः? मानः का सुखदा? साधुजनमैत्री।
सर्वव्यसनविनाशे को दक्षः? सर्वथा त्यागी।

अस्माभिः कदापि अभिमानः न कर्तव्यः यतः (i) ................................ परिणामे अनर्थकरः भवति। सज्जनानां मित्रता मानवेभ्यः सर्वदा सुखं ददाति। यः जनः (ii) .......... ...................... भवति सः सर्वेषां व्यसनानां विनाशं कर्तुं शक्नोति।

मञ्जूषा

| |
|---|
| त्यागी, सञ्चयम्, कोशः, मानः |

12. निम्नलिखितश्लोकस्य अन्वयं मञ्जूषातः समुचितं पदं चित्वा पूरयत। 1×4=4

मित्ररूपाः हि रिपवः सम्भाष्यन्ते विचक्षणैः।
ये हितं वाक्यमुत्सृज्य विपरीतोपसेविनः।।

अन्वयः- ये हितं (i) ................................ उत्सृज्य
विपरीतोपसेविनः (भवन्ति ते) (ii) ................................ मित्ररूपाः (iii) ................................ रिपवः (iv) ................................।

मञ्जूषा

| |
|---|
| हि, वाक्यम्, सम्भाष्यन्ते, विचक्षणैः |

13. वाक्येषु रेखाङ्कितपदानां स्थाने विकल्पेभ्यः उचितं प्रश्नवाचकपदं प्रयुज्य प्रश्ननिर्माणं कुरुत। 1×4=4

(i) <u>शुश्रूषायाः</u> अर्थः श्रोतुम् इच्छा भवति।

(अ) कस्य (ब) कस्याः

(स) कस्याम् (द) कयाः

(ii) सूर्योदये <u>तमः</u> नश्यति।

(अ) काम् (ब) कैः

(स) किम् (द) कम्

(iii) प्राणिनां मूढता निद्रा कथिता।

(अ) केषाम् (ब) कया

(स) कस्याः (द) का

(iv) राजा पुत्रवत् प्रजाः पालयति स्म।

(अ) कान् (ब) काः

(स) के (द) कथम्

14. अधोलिखितवाक्यानि घटनाक्रमेण पुनः लेखनीयानि। ½×8=4

(i) सः विद्वान् विनम्रः वृद्धानां सेवकः च आसीत्।

(ii) याचकाः अभीष्टानि वस्तूनि लब्ध्वा सन्तुष्टाः अभवन्।

(iii) बोधिसत्वः अनेकजन्मनां पुण्यफलैः शिवीनां राजा अभवत्।

(iv) राजा स्वशरीरस्य अङ्गानि अपि दातुं तत्परः अभवत्।

(v) सः याचकेभ्यः अन्नं धनं सुवर्णादिकानि अपि दातुं तत्परः अभवत्।

(vi) नृपः प्रसन्नमनसा याचकाय चक्षुर्द्वयम् अयच्छत्।

(vii) इन्द्रः राज्ञः दानशीलतां परीक्षितुम् अवाञ्छत्।

(viii) इन्द्रः नेत्रहीनयाचकस्य रूपं धृत्वा राजानम् नेत्रम् अयाचत्।

15. रेखाङ्कितपदानां प्रसङ्गानुसारम् उचितम् अर्थं चित्वा लिखत। 1×4=4

(i) अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति।

(अ) सरस्वति (ब) भारतदेशः

(स) भारतीयः जनः (द) भारतीया नारी

(ii) अहर्निशं महानसं प्रविश्य यत् पश्यति तद् भक्षयति।

(अ) मानसम् (ब) मानसरोवरम्

(स) पाकशालाम् (द) महान् पुरुषः

(iii) किम् जीवितम्? अनवद्यम्।

(अ) विद्यायुक्तम् (ब) अविद्यामानम्

(स) विद्यारहितम् (द) अनिन्दनीयम्

(iv) पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम्।

(अ) विनाशय (ब) त्यज

(स) प्रजा एव (द) प्रजायाः पालनम्